# अथ हंसगायत्रीमन्त्रः

अस्य श्री हंसगायत्रीमहामन्त्रस्य । अव्यक्त परब्रह्म ऋषि: । अव्यक्त गायत्री छन्द: परमहंसो देवता ॥ हं सां बीजं - हं सीं शक्तिः - हं सूं - कीलकम् ॥ परमहंस-प्रसाद सिध्यर्थे जपे विनियोगः ॥

**अथ ऋष्यादिन्यासः** -

**ॐ श्री अव्यक्तपरब्रह्मर्षये नमः - शिरसि। ॐ अव्यक्तगायत्री छन्दसे नमः - मुखे।**

**ॐ परमहंसदेवतायै नमः - हृदि। ॐ हं सां बीजाय नमः : गुह्ये।**

**ॐ हं सीं शक्तये नमः - पादयोः। ॐ हं सूं कलकीलकाय नमः - नाभौ।**

**ॐ परमहंसप्रसादसिद्ध्यर्थे विनियोगाय नमः - सर्वांगे।।**

**अथ करन्यासः** -

हंसां - अङ्गुष्ठाभ्यां नमः। हंसीं - तर्जनीभ्यां नमः।

हंसूं - मध्यमाभ्यां नमः। हंसैं - अनामिकाभ्यां नमः।

हंसौं - कनिष्ठिकाभ्यां नमः। हंसः - करतल-करपृष्ठाभ्यां नमः।

**अथ हृदयादिन्यासः** -

हंसां - हृदयाय नमः । हंसीं - शिरसे स्वाहा।

हंसूं - शिखायै वषट्। हंसैं - कवचाय हुं।

हंसौं - नेत्रत्रयाय वौषट् । हंसः - अस्त्राय फट् । भूर्भुवःसुवरोम् इति दिग्बन्धः ।

**अथ ध्यानम्** -

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम् ।
पश्यामि ते सर्व जनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥ (4.1)
देहो देवालयः प्रोक्तो जीवो देवःसनातनः।
त्यजेदज्ञाननिर्माल्यं सोऽहम्भावेन पूजयेत् ॥ (4.2)

**(हंसगायत्री) हंसहंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात्** ॥ (4.3)

**अथ स्तुतिः** -

हंस हंसेति यो ब्रूयात् हंसो नाम सदाशिवः। एवं न्यासविधिं कृत्वा ततः सम्पुटमारभेत् ॥ (4.4)

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM